# શ્રીમદુગ્રતારાહૃદયસ્તોત્રમ્

Shrimad Ugratara Hridayastotram

sanskritdocuments.org

November 29, 2018

# Shrimad Ugratara Hridayastotram

# શ્રીમદુગ્રતારાહૃદયસ્તોત્રમ્

## Sanskrit Document Information

Text title : ugratArAhRidayastotram

File name : ugratArAhRidayastotram.itx

Category : hRidaya, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Latest update : December 31, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 29, 2018

*sanskritdocuments.org*

# શ્રીમદુગ્રતારાહૃદયસ્તોત્રમ્

શ્રીશિવ ઉવાચ ।
શૃણુ પાર્વતિ ભદ્રં તે લોકાનાં હિતકારકમ્ ।
કથ્યતે સર્વદા ગોપ્યં તારાહૃદયમુત્તમમ્ ॥ ૧॥

શ્રીપાર્વત્યુવાચ ।
સ્તોત્રં કથં સમુત્પન્નં કૃતં કેન પુરા પ્રભો ।
કથ્યતાં સર્વસદ્વૃત્તં(સદ્ વૃત્તં) કૃપાં કૃત્વા મમોપરિ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
રણે દેવાસુરે પૂર્વં કૃતમિન્દ્રેણ સુપ્રિયે ।
દુષ્ટશત્રુવિનાશાર્થં બલવૃદ્ધિયશસ્કરમ્ ॥ ૩॥

વિનિયોગઃ ।
ૐ અસ્ય શ્રીમદુગ્રતારાહૃદયસ્તોત્રમન્ત્રસ્ય શ્રીભૈરવઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીમદુગ્રતારાદેવતા । સ્ત્રીં બીજમ્ । હૂં શક્તિઃ ।
નમઃ કીલકમ્ । સકલશત્રુવિનાશાર્થે પાઠે વિનિયોગ ॥

॥ ઋષ્યાદિન્યાસઃ ॥

શ્રીભૈરવ ઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીમદુગ્રતારા દેવતાયૈ નમઃ હૃદિ ।
સ્ત્રીં બીજાય નમઃ ગુહ્યે ।
હૂં શક્તયે નમઃ નાભૌ ।
નમઃ કીલકાય નમઃ પાદયોઃ ।
સકલ શત્રુવિનાશાર્થે પાઠે વિનિયોગાય નમઃ અઞ્જલૌ ॥

॥ ઇતિ ઋષ્યાદિન્યાસઃ ॥

॥ અથ કરન્યાસઃ ॥

ૐ સ્ત્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હૂં મધ્યમાભ્યાં નમઃ ।
ૐ ત્રીં અનામિકાભ્યાં નમઃ ।
ૐ ઐં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હંસઃ કરતલ કરપૃષ્ઠાભ્યાં નમઃ ॥

॥ ઇતિ કરન્યાસઃ ॥

॥ અથ હૃદયાદિષડઙ્ગન્યાસઃ ॥

ૐ સ્ત્રીં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હૂં શિખાયૈ વષટ્ ।
ૐ ત્રીં કવચાય હુમ્ ।
ૐ ઐં નેત્રત્રયાય વૌષટ્ ।
ૐ હંસઃ અસ્ત્રાય ફટ્ ॥

॥ ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

॥ અથ ધ્યાનમ્ ॥

ૐ ધ્યાયેત્કોટિદિવાકરદ્યુતિનિભાં બાલેન્દુયુક્શેખરાં
રક્તાઙ્ગીં રસનાં સુરક્તવસનાં પૂર્ણેન્દુબિમ્બાનનામ્ ।
પાશં કર્ત્રીમહાઙ્કુશાદિ દધતીં દોર્ભિશ્ચતુર્ભિર્યુતાં
નાનાભૂષણભૂષિતાં ભગવતીં તારાં જગત્તારિણીમ્ ॥ ૪॥

॥ ઇતિ ધ્યાનમ્ ॥

એવં ધ્યાત્વા શુભાં તારાં તતસ્તુ હૃદયં પઠેત્ ॥

તારિણી તત્ત્વનિષ્ઠાનાં સર્વતત્ત્વપ્રકાશિકા ।
રામાભિન્ના પરાશક્તિઃ શત્રુનાશં કરોતુ મે ॥ ૫॥

સર્વદા શત્રુસંરમ્ભે તારા મે કુરુતાં જયમ્ ।
સ્ત્રીં ત્રીંસ્વરૂપિણી દેવી ત્રિષુ લોકેષુ વિશ્રુતા ॥ ૬॥

તવ સ્નેહાન્મયાખ્યાતં ન પૈશુન્યં પ્રકાશ્યતામ્ ।
શૃણુદેવિ તવ સ્નેહાત્ તારાનામાનિ તત્ત્વતઃ ॥ ૭॥

વર્ણયિષ્યામિ ગુહ્યાનિ દુર્લભાનિ જગત્ત્રયે ।
તારિણી તરલા તારા ત્રિરૂપા તરણિપ્રભા ॥ ૮॥

સત્ત્વરૂપા મહાસાધ્વી સર્વસજ્જનપાલિકા ।
રમણીયા રજોરૂપા જગત્સૃષ્ટિકરી પરા ॥ ૯॥

તમોરૂપા મહામાયા ઘોરરાવાં ભયાનકા ।
કાલરૂપા કાલિકાખ્યા જગદ્વિધ્વંસકારિકા ॥ ૧૦॥

તત્ત્વજ્ઞાનપરાનન્દા તત્ત્વજ્ઞાનપ્રદાઽનઘા ।
રક્તાઙ્ગી રક્તવસ્ત્રા ચ રક્તમાલાપ્રશોભિતા ॥ ૧૧॥

સિદ્ધિલક્ષ્મીશ્ચ બ્રહ્માણી મહાકાલી મહાલયા ।
નામાન્યેતાનિ યે મર્ત્યાઃ સર્વદૈકાગ્રમાનસાઃ ॥ ૧૨॥

પ્રપઠન્તિ પ્રિયે તેષાં કિઙ્કરત્વં કરોમ્યહમ્ ।
તારાં તારપરાં દેવીં તારકેશ્વરપૂજિતામ્ ॥ ૧૩॥

તારિણીં ભવપાથોધેરુગ્રતારાં ભજામ્યહમ્ ।
સ્ત્રીં હ્રીં હૂં ત્રીં ફટ્ મન્ત્રેણ જલં જપ્ત્વાઽભિષેચયેત્ ॥ ૧૪॥

સર્વે રોગાઃ પ્રણશ્યન્તિ સત્યં સત્યં વદામ્યહમ્ ।
ત્રીં સ્વાહાન્તૈર્મહામન્ત્રૈશ્ચન્દનં સાધયેત્તતઃ ॥ ૧૫॥

તિલકં કુરુતે પ્રાજ્ઞો લોકો વશ્યો ભવેત્પ્રિયે ।
સ્ત્રીં હ્રીં ત્રીં સ્વાહા મન્ત્રેણ શ્મશાનં ભસ્મમન્ત્રયેત્ ॥ ૧૬॥

શત્રોર્ગૃહે પ્રતિક્ષિપ્ત્વા શત્રોર્મૃત્યુર્ભવિષ્યતિ ।
હ્રીં હૂં સ્ત્રીં ફડન્તમન્ત્રૈઃ પુષ્પં સંશોધ્ય સપ્તધા ॥ ૧૭॥

ઉચ્ચાટનં નયત્યાશુ રિપૂણાં નૈવ સંશયઃ । var ભવત્યાશુ
સ્ત્રીં ત્રીં હ્રીં મન્ત્રવર્યેણ અક્ષતાશ્ચાભિમન્ત્રિતાઃ ॥ ૧૮॥

તત્પ્રતિક્ષેપમાત્રેણ શીઘ્રમાયાતિ માનિની।
(હંસઃ ૐ હ્રીં સ્ત્રીં હૂં હંસઃ)
ઇતિ મન્ત્રેણ જપ્તેન શોધિતં કજ્જલં પ્રિયે ॥ ૧૯॥

તસ્યૈવ તિલકં કૃત્વા જગન્મોહં સમાચરેત્ ।
તારાયાઃ હૃદયં દેવિ સર્વપાપપ્રણાશનમ્ ॥ ૨૦॥

વાજપેયાદિયજ્ઞાનાં કોટિકોટિગુણોત્તરમ્ ।

ગઙ્ગાદિસર્વતીર્થાનાં ફલં કોટિગુણાત્સ્મૃતમ્ ॥ ૨૧॥

મહાદુઃખે મહારોગે સઙ્કટે પ્રાણસંશયે ।
મહાભયે મહાઘોરે પઠેત્સ્તોત્રં મહોત્તમમ્ ॥ ૨૨॥

સત્યં સત્યં મયોક્તં તે પાર્વતિ પ્રાણવલ્લભે।
ગોપનીયં પ્રયત્નેન ન પ્રકાશ્યમિદં ક્વચિત્ ॥ ૨૩॥

॥ ઇતિ શ્રીભૈરવીતન્ત્રે શિવપાર્વતીસમ્વાદે
શ્રીમદુગ્રતારાહૃદયં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shrimad Ugratara Hridayastotram*
pdf was typeset on November 29, 2018

Please send corrections to *sanskrit@cheerful.com*